॥ श्रीमदानन्दतीर्थ भवत्पादाचार्यविरचितः तत्त्वविवेकः ॥

। हरिः ॐ ।

स्वतन्त्र परतन्त्रं च प्रमेयं द्विविधं मतम् ।
स्वतन्त्रो भगवान् विष्णुः निर्दोषाखिलसद्गुणः ॥ १ ॥

द्विविधं परतन्त्रं च भावोऽभाव इतीरितः ।
पूर्वापरसदात्वेन त्रिविधोऽभाव इष्यते ॥ २ ॥

भावाभावस्वरूपत्वात् नान्योन्याभावता पृथक् ।

चेतनोऽचेतनश्चेति भावश्च द्विविधः स्मृतः ।
नित्यमुक्तश्च सृतियुक् परतन्त्रोऽपि चेतनः ॥ ४ ॥

द्विधैव श्रीर्नित्यमुक्ताः सृतियुक् स द्विधा मतः ।
मुक्तोऽमुक्त इति ह्यत्र ब्रह्मान्ता उत्तरोत्तरम् ॥ ५ ॥

मुक्ताः शतगुणाः प्रोक्ताः रमा तेभ्योऽखिलैर्गुणैः ।
नित्यं बहुगुणोद्रिक्ता ततोऽनन्तगुणो हरिः ॥ ६ ॥

अमुक्तास्त्रिविधास्तत्र नीचमध्योच्चभेधतः ।
मुक्तियोग्यास्तत्र चोच्चाः नित्यावर्तास्तु मध्यमाः ॥ ७ ॥

नीचा नित्यतमोयोग्याः द्विधैवाचेतनं मतम् ।
नित्यानित्यत्वभेदेन देशः कालः श्रुतिस्तथा ॥ ८ ॥

एषां विकारोऽनित्यः स्यात् नित्या एव हि चेतनाः ।
गुण क्रिया जातिपूर्वा धर्माः सर्वेऽपि वस्तुनः ॥ ९ ॥

रूपमेव द्विधं तच्च यावद्वस्तु च खण्डितम् ।
खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत् ॥ १० ॥

खण्डितं रूपमेवात्र विकारोऽपि विकारिणः ।
कार्यकारणयोश्चैव तथैव गुणतद्वतोः ॥ ११ ॥

क्रियाक्रियावतोस्तद्वत् तथा जातिविशेषयोः ।
विशिष्टशुद्धयोश्चैव तथैवाम्शान्शिनोरपि ॥ १२ ॥

य एतत् परतन्त्रं तु सर्वमेव हरेः सदा ।
वशमित्येव जानाति संसारान्मुच्यते हि सः ॥ १३ ॥

॥ इति श्रीमदानन्दतीर्थ भगवत्पादाचार्यविरचितं तत्त्वविवेक प्रकरणं सम्पूर्णम् ॥